तदारम्भे नक्षत्रादि दीपिकायाम् ।
‘पुष्यामित्रकरोत्तरश्रवणत्वाष्ट्रास्वपित्र्येन्दुभि:
प्रशस्तेऽर्के शुभयोगवारतिथिषु क्रूरेष्ववीर्य्येषु च ।
पुष्टेन्दौ जलराशिगे दशमगे शुक्रे शुभांशोदये
प्रारम्भ: सलिलाशयस्य शुभदो जीवेन्दुपुत्त्रोदये ॥’
पुष्यानुराधा-हस्तोत्तरात्रय-धनिष्ठा शतभिषा-रोहिणी-पूर्व्वाषाढ़ा-मघा-मृगशिरोभि: ॥ मातृस्थे ।
‘चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
स्तम्भोच्छ्रायादि कर्त्तव्यमन्यत्र परिवर्जयेत् ॥
अश्विनी रोहिणी मूलमुत्तरात्रयमैन्दवम् ।
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ॥
वज्रव्याघातशूले च व्यतीपातातिगण्डयो: ।
विष्कम्भगण्डपरिघवर्ज्जं योगेषु कारयेत् ॥
आदित्यभौमवर्ज्जन्तु सर्व्वे वारा: शुभावहा: ।
प्रासादेऽप्येवमेव स्यात् कूपवापीषु चैव हि ॥’
ज्योतिषे । गुरोर्भृगोरस्तबाल्ये इत्यभिधाय प्रतिष्ठारम्भणे देवकूपादेर्व्वर्जयन्ति हि ॥ * ॥
उत्सर्गफलमाह । कपिलपञ्चरात्रे ।
‘संक्षेपात्तु प्रवक्ष्यामि जलदानफलं शृणु ।
पुष्करिण्यादिदानेन विष्णु: प्रीणाति विश्वधृक् ॥’
जलाशयकरणार्थभूमिदानफलमाह चित्रगुप्त: ।
‘जलाशयार्थं यो दद्यात् वारुणं लोकमाप्नुयात् ॥’
भूमिमिति शेष: ॥ * ॥ तत्प्रतिष्ठाकालमाह । मत्स्यपुराणम् ।
‘शृणु राजन् ! महाबाहो ! तड़ागादिषु यो विधि: ।
चैत्रे वा फाल्गुने वापि ज्यैष्ठे वा माधवे तथा ॥
माघे वा सर्व्वदेवानां प्रतिष्ठा शुभदा भवेत् ।
प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे ॥
पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम् ॥’
अतीते प्रवृत्ते । तथा च प्रतिष्ठासमुच्चये ।
‘माघेऽथ फाल्गुने वापि चैत्रवैशाखयोरपि ।
ज्यैष्ठाषाढ़कयोर्वापि प्रवृत्ते चोत्तरायणे ॥’
ब्राह्मणवाचनं पुण्याहस्वस्तिऋद्धिवाचनम् ॥*॥
‘पञ्चमी च द्वितीया च तृतीया सप्तमी तथा ।
दशमी पौर्णमासी च तथा श्रेष्ठा त्रयोदशी ।
आसु प्रतिष्ठा विधिवत् कृत्वा बहुफला भवेत् ॥
आषाढ़े द्वे तथा मूलमुत्तरात्रयमेव च ।
ज्येष्ठाश्रवणरोहिण्य: पूर्व्वभाद्रपदा तथा ॥
हस्ताश्विनी रेवती च पुष्यो मृगशिरस्तथा ।
अनुराधा तथा स्वाती प्रतिष्ठादिषु शस्यते ॥*॥
बुधो बृहस्पति: शुक्रस्त्रय एते शुभावहा: ।
एतन्निरीक्ष्य तं लग्नं नक्षत्रञ्च प्रशस्यते ॥
ग्रहताराबलं लब्ध्वा ग्रहपूजां विधाय च ।
निमित्तं शकुनं ज्ञात्वा वर्ज्जयित्वाद्भुतादिकम् ॥
शुभयोगे शुभग्रहे क्रूरग्रहविवर्ज्जिते ।
लग्ने ऋक्षे च कुर्व्वीत प्रतिष्ठादिकमुत्तमम् ॥*॥
अयने विषुवे तद्वत् षड़शीतिमुखे तथा ।
एतेषु स्थापनं कार्य्यं विधिदृष्टेन कर्म्मणा ॥’
भविष्ये ।
‘प्रतिपच्च द्वितीया च तृतीया पञ्चमी तथा ।
दशमी त्रयोदशी चैव पौर्णमासी च कीर्त्तिता ॥
सोमो बृहस्पतिश्चैव शुक्रश्चैव तथा बुध: ।
एते सौम्यग्रहा: प्रोक्ता: प्रतिष्ठायागकर्म्मणि ॥’
प्रतिष्ठाधिकारे व्यवहारसमुच्चय: ।
‘कृष्णपक्षे च पञ्चम्यामष्टम्याश्चैव शस्यते ॥’
दीपिकायाम् ।
‘पुष्याश्विशक्रभगरेवतवासवेषु
सौम्यानिलेशमघरोहिणिमूलहस्ते ।
मैत्र्यानुराधहरिभेषु पुनर्व्वसौ च
कार्य्याभिषेकतरुभूतपतिप्रतिष्ठा ॥’
वासवं धनिष्ठा । ईश आर्द्रा । आर्द्रायाश्चैव सौभाग्यमिति प्रतिष्ठासारसमुच्चयात् ॥ * ॥
वाप्यादीनां पूर्त्तत्वाभिधानात् शूद्रस्याधिकारमाह जातूकर्ण्य: ।
‘वापीकूपतड़ागादि देवतायतनानि च ।
अन्नप्रदानमारामा: पूर्त्तमित्यभिधीयते ॥
अग्निहोत्रं तप: सत्यं वेदानामनुपालनम् ।
आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते ॥
ग्रहोपरागे यद्दानं पूर्त्तमित्यभिधीयते ।
इष्टापूर्त्तं द्विजातीनां धर्म्म: सामान्य उच्यते ॥
अधिकारी भवेत् शूद्र: पूर्त्ते धर्म्मे न वैदिके ॥’
वैदिके वेदाध्ययनसाध्ये अग्निहोत्रादाविति रत्नाकर: ॥ एवं स्त्रीणामपि पूर्त्ताधिकार: । यथा, नारीत्वमुक्तौ बृहस्पति: ।
‘पितृव्यगुरुदौहित्रान् भर्त्तु: स्वस्त्रीयमातुलान् ।
पूजयेत् कव्यपूर्त्ताभ्यां वृद्धानाथातिथीन् स्त्रिय: ॥’
अस्य पूर्त्तत्वात् वृद्धिश्राद्धमप्यादौ कर्त्तव्यम् । यथा, गोभिल: । ‘वृद्धि: पूर्त्तेषु युग्मा नाशयेत् प्रदक्षिणमुपचार: । यवैस्तिलार्थ इति ।’ * ॥
हयशीर्षपञ्चरात्रे ।
‘वापीकूपतड़ागानां पश्चिमे यागमण्डपम् ।
कुर्य्याद्यथाक्रमेणैव कन्यसं मध्यमुत्तमम् ॥
कन्यसं दशहस्तन्तु कूपे शस्तं तथानघ ! ।
द्विषट्कं कारयेद्वाप्यां पुष्करिण्यां चतुर्द्दश ।
द्विरष्टहस्तं कुर्व्वीत तड़ागे मण्डपं शुभम् ॥’
कन्यसं कनीयांसम् ॥ * ॥ सङ्कल्पविधिमाह भविष्ये ।
‘गृहीत्वौडुम्बरं पात्रं वारिपूर्णं गुणान्वितम् ।
दर्भत्रयं साग्रमूलं फलपुष्पसमन्वितम् ॥
जलाशयारामकूपे सङ्कल्पे पूर्व्वदिङ्मुख: ।
साधारणे चोत्तरास्य ऐशान्यां निक्षिपेत् पय: ॥’
मत्स्यपुराणे ।
‘प्रागुदक्प्रवणे देशे तड़ागस्य समीपत: ।
चतुर्हस्तां शुभां वेदीं चतुरस्रां चतुर्मुखीम् ॥’
कारयेदित्यर्थ: । तथा,—
‘सर्व्वत: समवर्णा: स्यु: पताका ध्वजसंयुता: ॥’
समवर्णा वक्ष्यमाणलोकपालवर्णा: ।
‘अश्वत्थोडुम्बरप्लक्षवटशाखाकृतानि च ।
मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत् ॥’
तथा ।
‘कुलशीलसमापन्न: स्थापक: स्याद्द्विजोत्तम: ॥’
स्थापक आचार्य्य इति रत्नाकर: ॥ * ॥
‘सौवर्णौ कूर्म्ममकरौ राजतौ मत्स्यडुण्डुभौ ।
ताम्रौ कुलीरमण्डूकावायस: शिशुमारक: ॥
एवमासाद्य तान् सर्व्वानादौ चैव विशाम्पते ! ।
शुक्लमाल्याम्बरधर: शुक्लगन्धविलेपन: ॥
सर्व्वौषध्युदकस्नानस्नापितो वेदपुङ्गव: ।
यजमान: सपत्नीक: पुत्त्रपौत्त्रसमन्वित: ।
पश्चिमं द्वारमाश्रित्य प्रविशेद्यागमण्डपम् ॥
ततो मङ्गलशब्देन भेरीणां नि:स्वनेन च ।
रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन तत्त्ववित् ॥
षोड़शारं ततश्चक्रं पद्मगर्भं चतुर्मुखम् ।
चतुरस्रञ्च परितो वृत्तं मध्ये सुशोभनम् ॥
वेद्याश्चोपरि तत् कृत्वा ग्रहांल्लोकपतींस्तथा ।
विन्यसेन्मन्त्रत: सर्व्वान् प्रतिदिक्षु विचक्षण: ।
झषादीन् स्थापयेन्मध्ये वारुणं मन्त्रमाश्रित: ॥’
झषादीन् कूर्म्मादीन् ।
‘ब्रह्माणञ्च शिवं विष्णुं तत्रैव स्थापयेद्बुध: ।
विनायकञ्च विन्यस्य कमलामम्बिकान्तथा ॥’
पूजयेदिति शेष: । तथा,—
‘नवग्रहमखं कृत्वा तत: कर्म्म समारभेत् ।
अन्यथा फलदं पुंसां न काम्यं जायते क्वचित् ॥’
ग्रहपूजामण्डलं शान्तिदीपिकायाम् ।
‘वर्त्तुलो भास्कर: कार्य्यो ह्यर्द्धचन्द्रो निशाकर: ।
अङ्गारकस्त्रिकोणस्तु बुधश्चापाकृतिस्तथा ॥
पद्माकृतिर्गुरु: कार्य्यश्चतुष्कोणस्तु भार्गव: ।
खड़्गाकृति: शनि: कार्य्यो राहुस्तु मकराकृति: ।
सर्पाकृतिस्तथा केतु: कार्य्यो मण्डलपूजने ॥’
मत्स्यपुराणे ।
‘देवतानां तत: स्थाप्या विंशतिर्द्वादशाधिका ।
सूर्य्य: सोमस्तथा भौमो बुधजीवसितार्कजा: ॥
राहु: केतुरिति प्रोक्ता ग्रहा लोकहिते रता: ।
मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु ॥
उत्तरेण गुरुं विद्याद्बुधं पूर्व्वोत्तरेण तु ।
पूर्व्वेण भार्गवं विद्यात् सोमं दक्षिणपूर्व्वके ॥
पश्चिमेन शनिं विद्याद्राहुं पश्चिमदक्षिणे ।
पश्चिमोत्तरत: केतुं स्थापयेत् शुक्लतण्डुलै: ॥*॥
भास्करस्येश्वरं विद्यादुमाञ्च शशिनस्तथा ।
स्कन्दमङ्गारकस्यापि बुधस्यापि तथा हरिम् ॥
ब्रह्माणञ्च गुरोर्व्विद्यात् शुक्रस्यापि प्रजापतिम् ।
शनैश्चरस्य तु यमं राहो: कालन्तथैव च ।
केतूनाञ्चित्रगुप्तञ्च सर्व्वेषामधिदेवता: ॥ * ॥
अग्निराप: क्षितिर्व्विष्णुरिन्द्र ऐन्द्री च देवता: ।
प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदेवता: ॥ * ॥
विनायकं तथा दुर्गां वायुमाकाशमेव च ।
आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ ।
संस्मरेद्रक्तमादित्यमङ्गारकसमन्वितम् ।
सोमशुक्रौ तथा श्वेतौ बुधजीवौ च पिङ्गलौ ॥
मन्दराहू तथा कृष्णौ धूम्रं केतुगणं विदु: ।
ग्रहवर्णानि देयानि वासांसि कुसुमानि च ॥
धूपामोदोऽत्र सुरभिरुपरिष्टाद्वितानकम् ।
शोभनं स्थापयेत् प्राज्ञ: फलपुष्पसमन्वितम् ॥
गुड़ौदनं रवे: कुर्य्यात् सोमाय घृतपायसम् ।
संयावकं कुजे दद्यात् क्षीरान्नं सोमसूनवे ॥